# समासपरिचयः PART III(HONOURS) PAPER VI

DEBANJAN MAITY

DEPT. OF SANSKRIT

SIDDHINATH MAHAVIDYALAYA

# समास-शब्दस्य व्युत्पत्तिगतोऽर्थः

समाससंज्ञा एका अन्वर्थसंज्ञा।

- ‘समस्यते अनेकं पदम्’ – सम् + (दिवादिगणीयः) अस् + कर्मणि घञ्-प्रत्ययः (‘अकर्तरि कारके च संज्ञायाम्’ – ३.३.१९)। ‘अत उपधायाः’ (७.२.११६) वृद्धिः भवति।
- ‘समसनं समासः’ – सम् + (दिवादिगणीयः) अस् + भावे घञ् (‘अकर्तरि कारके च संज्ञायाम्’ – ३.३.१९)। ‘अत उपधायाः’ (७.२.११६) वृद्धिः भवति।
- ‘यस्मिन् समवाये पदद्वयादिकं परस्परं समस्यते स समासः’ – सम् + (दिवादिगणीयः) अस् + अधिकरणे घञ् भवति।
- बहूनां पदानाम् एकपदीकरणमेव समासः।

# समासस्य प्रयोजनम्

- ‘प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते’

- व्याकरणशास्त्रे लाघवं हि महत् प्रयोजनम्।
- काशिका – ‘समासस्य प्रयोजनमैकपद्यमैकस्वर्यञ्च’। अर्थात्
- १) एकपदीकरणम् (यथा – राज्ञः पुरुषः), २) अनेकपदगत-स्वरस्य  एकपदगतः स्वरभावः, ३) एकविभक्तित्वम् अर्थात् अनेकपदेभ्यः उत्तरं विभक्तीनां पदसाधुत्वाय पुनः एका विभक्तिः भवति

# वृत्तिस्वरूपम्

- ‘परार्थाभिधानं वृत्तिः’ – परश्चासौ अर्थः – परार्थः, परार्थस्य अभिधानम् – परार्थाभिधानम्।
- तत्त्वबोधिनी – ‘प्रत्ययान्तर्भावेन अपरपदार्थान्तर्भावेन वा यो विशिष्टोऽर्थः स परार्थः, स चाभिधीयते येन तत् परार्थाभिधानम्’
- वृत्तिः पञ्चविधा – कृत्, तद्धितः, समासः, एकशेषः, सनाद्यन्तधातुः।
- वृत्त्यर्थाववोधकं वाक्यं विग्रहः। विग्रहः द्विविधः – लौकिकः अलौकिकश्च।

# समासस्य भेदः

- ‘समासश्चतुर्विध इति तु प्रायोवादः’
  - प्राचीनवैयाकरणानां मते समासः चतुर्विधः – अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः, द्वन्द्वः।
  - चतुर्विधात् समासात् परमपि ‘सह सुपा’ इति पृथक् समासः दृश्यते।
  - समासानां लक्षणसङ्गतिः न जायते।
  - तत्पुरुषस्य भेदः हि कर्मधारयः, तद्विशेषः हि द्विगुः।
  - समासः सप्तविधः इति विषये एकम् आभाणकं वर्तते –

‘द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष! कर्मधारय येनाहं स्यां बहुव्रीहिः॥’

# समासस्य भेदविषये सिद्धान्तः

- वैयाकरणसिद्धान्तकौमुद्याः रचयिता हि भट्टोजिदीक्षितः।
- दीक्षितमते – समासः षड्-विधः –

‘सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा।
सुबन्तेनेति विज्ञेयः समासः षड्-विधो बुधैः॥’

१) सुबन्तेन सह सुबन्तस्य समासः। यथा – राज्ञः पुरुषः – राजपुरुषः।

२) तिङन्तेन सह सुबन्तस्य समासः। यथा – परि + अभूषयत् –पर्यभूषयत्।

३) सुबन्तेन सह नाम्ना समासः। यथा – कुम्भकारः (कुम्भस्य कार)।

४) धातुना सह सुबन्तस्य समासः। यथा – कटप्रूः।

५) तिङन्तेन सह तिङन्तस्य समासः। यथा – पिबतखादता।

६) सुबन्तेन सह तिङन्तस्य समासः। यथा – कृन्तविचक्षणा।

# धन्यवादः

“यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्”